International Journal of Sanskrit Research 2020; 6(6): 84-86

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(6): 84-86
© 2020 IJSR
www.anantaajournal.com
Received: 20-09-2020
Accepted: 26-10-2020

**Dr. Sayyad Subhani**
Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. Sayyad Subhani**
Tirupati, Andhra Pradesh, India

# अलङ्कारशास्त्रे रसस्वरूपविचारः

**Dr. Sayyad Subhani**

## प्रस्तावना

भारतीयालङ्कारशास्त्रे आचार्यद्रुहिणादारभ्य पण्डितराजजगन्नाथपर्यन्तं रसनिष्पत्तौ स्वरूपे विकासे च गम्भीरतया विचारो दृश्यते। तत्र सर्वप्रथमं नाट्यशास्त्रप्रणेता भरतमुनिः नाट्यशास्त्रे अथर्ववेदोक्तं रसमनुसृत्य रससिद्धान्तमस्थापयत्। एवञ्चालङ्कारशास्त्रे रसतत्त्वस्य प्रथमः समुद्भावकः भवति भरतमुनिरेव। अस्य मते रसं विना किमपि नाट्यं कथमपि प्रवर्तयितुं न शक्यते।[1] रसविदां मते अलङ्कारशास्त्रस्य मूलतत्त्वं रस एव विद्यते । अतः अलङ्कारशास्त्रे रसोऽवश्यं स्वीकार्य एव।

भरतमुनेरनन्तरं दृश्य–श्रव्योभयविधकाव्यतत्वविद्भिः प्रत्यक्षाप्रत्यक्षरूपेण रससिद्धान्तस्य विकासे महत्वपूर्णः प्रयासः कृतः। भामह – दण्डि – रुय्यक – कुन्तक – क्षेमेन्द्र – श्रीमदानन्दवर्धनाचार्य – श्रीमदभिनवगुप्ताचार्य–मम्मटाचार्य-पण्डितराजजगन्नाथादयश्चेत्येते सर्वेऽपि रससिद्धान्तस्य परिष्करणे प्रशंसनीयं प्रयत्नं चक्रुः। धनञ्जयः– शारदातनय – सिङ्गभुपाल रामचन्द्र – गुणचन्द्रादयश्च रसविषये स्तुत्यं प्रयत्नमकुर्वन्। रससिद्धान्तवादिनोः भोजराजभानुदत्तयोरपि प्रयासो विषयेऽस्मिन् प्रशंसनीय एव। भरतमुनेः रससूत्रस्य व्याख्यातारो लोल्लट – शङ्कुक – भट्टनायकाभिनवगुप्त – महिमभट्टादयश्च रससिद्धान्तस्य प्राधान्यपरिपोषणे महान्तं यत्नमकार्षुः। एतैः नाट्यादिरूपेण लौकिकत्वेऽप्यलौकिकब्रह्मानन्दस्वरूपस्य रसस्य महनीयं कमनीयं स्वरूपं प्रतिपादितं वर्तते ।

रसस्य शृङ्गारादि भेदो हि सर्वथा प्राचीनो वर्तते। शृङ्गारादिरसानां नाम्ना निर्देशस्तु लौकिकसाहित्ये प्रथमतो भगवता आद्यकविना वाल्मीकिना श्रीमद्रामायणे बालकाण्डे कृतो विद्यते। पश्चाद् भरतमुनिना स्वविरचिते नाट्यशास्त्रे अष्टौ रसाः परिगणिताः।[2] किन्तु केषाञ्चिन्मते नवमः शान्तरसः, वत्सल्यनामको दशमरसः, एकादशो भक्तिरसः तथा अन्येऽपि बहवो रसाः पृथक् रूपेण उद्भूताः । तत्र माधुर्यमयप्रेमसमन्वितस्य भक्तिरसस्य संस्थापको भवति भगवद्भक्तिरससंसिक्ततरलहृदय श्री गौडीयगोस्वामी ।

**रसस्वरूपविचारः**

रससम्प्रदायस्य प्रवर्तकः भवति श्री भरतमनिः। तेन रसस्वरूपनिरूपणाय "विभावानुभाषव्यभिचारिसंयोगात्सनिष्पत्ति" इति सूत्रितं स्वीये रससूत्रे। तत्तद्दर्शनाचार्याः तत्तद्दर्शनानुसारमस्य सूत्रस्य व्याख्यानमकुर्वन्। तत्र केचन नैयायिकाः , केचन वेदान्तिनः, केचन मीमांसकाः, केचनाद्वैतिनः। तत्र नैयायिकः श्रीशङ्कुको रसानुभूतिश्चुमितिजन्येति प्राच्यन्यायानुसारेण प्रत्यपादयत्। एतन्मते विभावानुभावव्यभिचारिभ्योऽनुमितः स्थाय्येव रसः, अनुकार्ये नलादौ यत्र गृहीतैः विभावादिभिरनुकार्यभिन्ने नटे रसस्यानुमानं क्रियते। वेदान्तानुसारी भट्टनायकः काव्ये भावकत्वभोजकत्वनाम्नी द्वे स्वतन्त्रे शक्ती अभ्युपगम्य प्रेक्ष्यप्रेक्षकयोः साधारणीभावजन्योऽयमिति मनुते स्म। एतन्मते रसास्वदो ब्रह्मास्वादसहोदरः। काव्यानन्दब्रह्मानन्दयोरयमेव भेदः यत् काव्यानन्दे चैतन्यं विषयोपरक्तं भवति न तु ब्रह्मानन्दे। मीमांसकानुसारिणः भट्टलोल्लटस्योत्पत्तिवादानुसारं विभावादिकारणैस्सह दमयन्त्यादि दर्शनजन्यनलादिस मवेतरत्युद्बोधस्य स्थायिभावस्य तत्कार्यकटाक्षादिसह चारितोत्कण्ठादीनाञ्च अनुकार्यनलादिनैव सम्बन्धात्तत्रैव रस उत्पद्यते, नटे तु तत्तदनुकृत्या सादृश्यमूलकारोपो विधीयते।

रससिद्धान्तं स्थापयन् अभिनवगुप्तस्तु प्रेक्ष्य-प्रेक्षकयोः साधारणीभावोभवतीति प्रदर्शयन् भावकत्वभोजकत्वशक्त्यभ्युपगमो व्यर्थ इति च सिद्धान्तयन् रसानुभवे प्रक्रियात्रयं स्वीकरोति। प्रथमप्रक्रियायाम् सहृदयः दृश्यदर्शनध्वनियुक्तश्रव्यश्रवणान्तरं स्वप्रतिभया कविमनोगतचित्रसदृशं विभावानुभावव्यभिचारिणां देशकालव्यक्तिविशेषसम्बन्धशून्यं चित्रं स्वान्तः करणे चित्रयति। वासनारूपेण स्थितस्य विभावादिसमुचितस्य स्थापिभावस्य जागरणात् तेन सह विभावानुभावव्याभिचारिभावानां पानकरसन्यायेनसम्मिश्रणादभिव्यक्तरसमनुभवति।

द्वितीयप्रक्रियायां स्थायित्वेन विभावानुभाववर्गे सम्मिश्रितोऽपि स्थाय्येव चर्व्यते। यथा हि अभिनवगुप्तः –

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दते बद्धदृष्टिः।
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्॥[3]

इत्यादि वाक्येभ्यो वाक्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिकाऽपहसिततत्तद्वाक्योपात्तकालादिविभागा तावत्प्रतीतिरुपजायते। तस्यां च या मृगपोतकादि भीतिः तस्याः विशेषरूपत्वाभावात् भीत इति त्रासकस्यापारमार्थिकत्वात् भयमेव देशकालाद्यनालिङ्गतम्। तत एव भीतोऽहं, भीतोऽयं शतृर्वयस्यो मध्यस्थो वा इत्यादि प्रत्ययेभ्यो दुःखसुखादिकृत हानदिबुद्ध्युत्तरोदय नियमवत्तया विहनबहुलेभ्यो विलक्षणं निर्विघ्नप्रतीतिग्राह्यं साक्षादिव हृदये निर्विशमनं चक्षुषोरिव विपरिवर्तमानं भयानको रसः।[4]

तृतीयप्रक्रियायां संविदः पूर्णतयान्तर्मुखी भूतत्वात् विषयतयाऽवभासमानस्योद्बुध्य स्थायिनोऽपि वासनायां निमग्नत्वात् विषयिविषयिरूपं द्वैतं सर्वथा विनश्यति। एवं तृतीयप्रक्रियायामभिनवगुप्तमतानुसारं रसानुभवः परमानन्दानुभवो व्यतिरेकतुरीयातीतसमाधौ अनुभूयमानात् अनुभवाद्भिन्नः सर्वस्यापि वैषयिकज्ञानस्य वासनायां निमग्नत्वात् शुद्धस्य संविदात्मन आनन्दरूपे स्वरूपे भावनाच्च।[5] तथा चाभिवभारत्याम् अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखशङ्का।[6]

एवञ्च अभिनवगुप्तप्रतिपादितरसब्रह्मवादानुसारेण रसास्वादो चरमावस्थायां न ब्रह्मास्वादसहोदरो भट्टनायकमते यथा। पण्डितराजजगन्नाथमतस्थरत्याद्यवच्छिन्नाया भग्नावरणायाश्चित्तोऽनुभवः नास्ति, नापि स भग्नावरणचिद्विशिष्टस्य रत्यादेरनुभवः। निरवच्छिन्नपरमानन्दास्वाद एव रसास्वादो विद्यते।

रसशास्त्रानुसारेण रस्यन्ते आस्वाद्यन्ते इति रीत्या शृङ्गारवीरकरुणाद्भुतहास्यभयानकबीभत्सरौद्राख्याः रसाः स्वीक्रियन्ते। केषाञ्चिन्मते निर्वेदः शमो वा स्थायिभावो यस्य तादृशः शान्तरसः वात्सल्यस्थायी वात्सल्यरसः तथा भगवद्रतिस्थायी भक्तिरसोऽपि स्वीक्रियते। एवञ्च रसज्ञानां मतेऽष्टभेदो नवभेदो एकादशभेदो वा विद्यते।

**उपसंहारः**

अनेकैः विदुषैः नानाविधप्रकारेण रसस्वरूपं प्रतिपादितमस्ति । तथापि भरतस्य मतमेव अष्टाभेदाः एव सर्वे समर्थयन्ति ।

**सन्दर्भ**


1. नाट्यशास्त्रम् , भरतः भारतीयविद्याप्रकाशन्, दिल्ली ।
2. भक्तिरसविमर्शः, कपिलदेवब्रह्मचारी, भारतीयविद्याप्रकाशन् , वारणासी ।
3. काव्यानुशासनम्,हेमचन्द्रः, मेहरचन्द्रलक्ष्मणदासपब्लिकेशन, नवदेहली ।